M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1559

Title: Maha Aditya Stotra

1359

Incomplete

		Mahā-Adilya Slotrā	Title
		(Bhaviṣya-Purāṇā)	Author
			Editor
			Year, Vols.
			Publisher
1359		Pages 3-14	Remarks

मभ्यंतरेन्यसेत् ॥ सर्वांगेषु सहस्रांशुं दिग्विदिक्षु भयं न्यसेत् ॥ २४ ॥ एषमादि
त्यविन्यासो देवानामपि दुर्लभं ॥ इत्थं भक्त्या न्यसेत्पार्थ स याति परमां गतिं ॥ २५ ॥
कामक्रोधकृतात्पापात्मुच्यते नात्र संशयः ॥ सर्वदापि भयं नास्ति संग्रामेषु
पथिष्वपि ॥ २६ ॥ रिपुसंघट्टकालेषु तथा चोरसमागमे ॥ त्रिसंध्यं जपतो न्या
सं महापातकनाशनं ॥ २७ ॥ विस्फोटकसमुत्पन्नं तापज्वरविनाशनं ॥ शि
रोरोगं नेत्ररोगं सर्वव्याधिनाशनं ॥ २८ ॥ कुष्ठव्याधिस्तथा दद्रुरोगांश्च वि
विधांस्तथा ॥ जपमानस्य नश्यंति भक्त्या शृणु नरार्जुन ॥ २९ ॥ आदित्यमंत्रसं
युक्तमादित्यं भुवनेश्वरं ॥ ३० ॥ आदित्यमर्चयेद्ब्रह्मा आदित्यमर्चयेच्छिवः ॥

३

यादृदीप्तमयं तेजो मम तेजस्तदार्जुन ॥ ३१ ॥ आदित्यं ये प्रपश्यंति मां पश्यं
ति वै नराः ॥ त्रिसंध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः ॥ ३२ ॥ स न पश्यति दा
रिद्र्यं जन्मजन्मानि चार्जुन ॥ एतत्ते कथितं पार्थ आदित्यहृदयं मया ॥ ३३ ॥
मुच्यते वै स पापेभ्यो सूर्यलोकं स गच्छति ॥ नमो भगवते तुभ्यमादित्याय
नमो नमः ॥ ३४ ॥ १ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सु
वर्णः स्फटिको भानुः स्फुरितो विश्वतापनः ॥ ३५ ॥ हिरण्यगर्भस्त्रिशिरा
स्तपनो भास्करो रविः ॥ मार्तंडो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान् ॥
३६ ॥ तमिस्रहा भगो हंसो नासत्यस्तमीनुदः ॥ शुद्धो विरोचनः केशीस

हस्रांशुर्महाप्रभुः ॥ ३७ ॥ विवस्वान्पूषणो मृत्युर्मिहिरो जामदग्न्यजित् ॥ धर्म
रश्मिः पतंगश्च शरण्यो मित्रहा तथा ॥ ३८ ॥ दुर्विज्ञेयगतिः शूरस्तेजोरा
शिर्महायशाः ॥ शंभुश्चित्रांगदो सौम्यो हव्यकव्यप्रदायकः ॥ ३९ ॥ अंशुमानु
त्तमो देवो ऋग्यजुःसाम एव च ॥ हरिदश्वस्तमोहारी ससर्मरीचिमान् ॥ ४०
॥ अग्निगर्भोदितेः पुत्रः शंभुस्तिमिरनाशनः ॥ पूषा विश्वंभरो मित्रः सुवर्णः सु
प्रतापवान् ॥ ४१ ॥ आनपीडं संलीभास्वान्तपनः सर्वतापनः ॥ कृतविश्वो म
हातेजाः सर्वरत्नमयोद्भवः ॥ ४२ ॥ अक्षरश्चाक्षरश्चैव प्रभाकरदिवाकरौ ॥
चंद्रश्चंद्रांगदो सौम्यो हव्यकव्यदो प्रेयकः ॥ ४३ ॥ अंगारको गदो गस्त्यो

रक्तांगश्चांगवर्धनः। बुद्धो बुद्धासनो बुद्धिर्बुद्धात्मा बुद्धिवर्द्धनः।४४। बृहद्भानुर्बृह
द्भासो बृहद्धामा बृहस्पतिः। शुक्लस्त्वं शुक्लरेताश्च शुक्लांगः शुक्लभूषणः।४५। श्री
निमान् श्रीनिरूपश्च शनैर्गच्छसि सर्वदा। अनादिरादिरूपश्च आदित्यो दिग्पतिर्यमः
।४६। अनादिरादिरादित्यस्तेजोराशिर्महायशाः। भानुमान् भानुरूपस्त्वं स्वर्भानु
र्भानुदीप्तिमान्।४७। धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः।४७। मनपूर्वा
यगिरये पश्चिमायनमो नमः। नमोत्तरायगिरये दक्षिणायनमो नमः।४८।
नमो नमः सहस्रांशो आदित्याय नमो नमः। नमः पद्मप्रबोधाय नमस्ते द्वादशा
त्मने नमो विश्वप्रबोधाय नमो भ्राजिष्णुजिष्णवे। ज्योतिषे च नमस्तुभ्यं ज्ञा

नार्काय नमो नमः।५०। प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः। नमस्ते हो
तृपतये पृथिवीपतये नमः।५१। नमोंकार वषट्कार सर्वयज्ञ नमोस्तु ते। ऋग्वे
दाय यजुर्वेद सामवेद नमो नमः। जयाय जयभद्राय हरिदश्वाय ते नमः।
नमस्ते शुचये नित्यं नमः कुरुकुलात्मने।५४। नमो वैकल्पनाशाय नमस्ते
दिव्यचक्षुषे। त्वं ज्योतिस्त्वं धृतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः।५५। त्वमेव रु
द्रो रुद्रात्मा वायुरग्निस्त्वमेव च। योजनानां सहस्रे द्वे द्वे शते द्वे च योजने।५६
येकेन निमिषार्धेन क्रममाण ज्ञात कृते। अग्नतश्च नमस्तुभ्यं पृष्ठतश्च
नमोस्तु ते।५७। पार्श्वयोस्तु नमस्तुभ्यं नमस्ते चास्तु सर्वदा। नमो वेदां

५ गवेद्याय सर्वज्ञाय नमो नमः ॥५८॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने त
था ॥ चैत्रमासे तु वेदांगो भानुर्वैशाखतापनः ॥५९॥ ज्येष्ठमासे तपेदिंद्र आ
षाढे तपते रविः ॥ गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥६०॥ सुवर्ण
रेता ह्याश्वियुजे कार्तिके तु दिवाकरः ॥ मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सना
तनः ॥६१॥ इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः ॥ उग्ररूपा महा
त्मानस्तपंते विश्वरूपिणः ॥६२॥ धर्मार्थकाममोक्षाणां प्राप्यते हेतवे न्र
णां ॥ सर्वपापहरं चैव यमादित्यप्रपूजितं ॥६३॥ नवतिर्योजनं लक्ष सहस्रा
णि सप्ततिः ॥ यावद्घटिकमात्रेण तावच्चरति भास्करः ॥६४॥ एकधारा

तथा चैव शतधा च सहस्रधा ॥ पतंति विश्वरूपेण सृजंति च हरंति च ॥६५॥
एष विष्णुः शिवश्चैव ब्रह्मा चैव बृहस्पतिः ॥ माहेंद्रश्चैव कालश्च यमो वरुण
एव च ॥६६॥ नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥ वायुरग्निर्धनाध्यक्षो
भूतकर्ता स्वयंप्रभुः ॥६७॥ एष देवो हि देवानां सर्वमाप्यायते जगत् ॥ एष क
र्ता हि भूतानां संहर्ता रक्षकस्तथा ॥६८॥ एष दाता च भोक्ता च सदेवासुरम
नुषं ॥ एष लोकानुलोकांश्च सप्तद्वीपांश्च सागरान् ॥६९॥ एष पातालसप्त
स्थो दैत्यदानवराक्षसान् ॥ एष धाता विधाता च बीजं क्षेत्रं प्रजापतिः ॥
७०॥ एष एव प्रजा नित्यं संवर्धयति रश्मिभिः ॥ एष ब्रह्मस्वधा स्वाहा ह्री

श्रीश्चपुरुषोतमः ॥७१॥ सर्वसर्वात्मको देवः सूक्ष्मोव्यक्तः सनातनः ॥ ईश्वरस
र्वभूतानांपरमेष्ठीप्रजापतिः ॥७२॥ कालात्माविश्वभूतात्माविश्वातोमुखः ॥
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥७३॥ दारिद्र्यव्यसनध्वंसिश्रीमा
यातुदिवाकरः ॥ इत्येतैर्नामभिःपार्थ आदित्यस्तोतिनित्यशः ॥७४॥ प्रातरुत्थाय
कौंतेयतस्यरोगभयंकुतः ॥ पातकान्मुचतेपार्थव्याधिभ्यस्तुनसंशयः ॥७५
॥ एकसंध्यंद्विसंध्यंवासर्वपापैःप्रमुच्यते ॥ त्रिसंध्यंजपमानस्तुपश्येच्चप
रमंपदं ॥७६॥ यदह्नाकुरुतेपापंतदह्नात्प्रतिमुच्यते ॥ यद्रात्र्याकुरुतेपा
पंतद्रात्र्यात्प्रतिमुचते ॥७७॥ दद्रुस्फोटककुष्ठानिमंडलानिविचर्चिका

येचान्येदुष्टरोगाभूतबाधास्तथैवच ॥ जपमानस्यनश्यंतीजीवेच्चशारदां
शतं ॥७९॥ सवत्सरेणमरणयदातस्यध्रुवंभवेत् ॥ अशीर्षंपश्येत्छा
यामहोरात्रंधनंजय ॥८०॥ यस्त्विदंपठतेनित्यंवारेभानोर्महात्मनः ॥
प्रातस्नानकृतेपार्थएकाग्रकृतमानसः ॥८१॥ सुवर्णचक्षुर्भवताना
चांधस्तुप्रजायते ॥ पुत्रवान्धनसंपन्नोजायचारोगःसुखं ॥८२॥ आ
दित्यहृदयंपुण्यंसूर्यनामविभूषितं ॥ श्रुत्वातुनिखिलंपार्थसर्वपा
पैप्रमुच्यते ॥८३॥ अतःपरतरंनास्तिसिद्धिकामस्यपांडव ॥ एत
ज्जपस्वकौंतेययेनश्रेयोह्यवाप्स्यसि ॥८४॥ आदित्यहृदयंपुण्यं

यःपठेत्सुसमाहितः। भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः ॥८५॥
गोघ्नः सुरापो दुर्भुक्ताद्दुःप्रतिग्रहएव च। पातकानि च सर्वाणि दहत्य
त्र न संशयः ॥८६॥ आदित्यहृदयं नित्यं जपेद्यापि समाहितः। सर्वपापवि
शुद्धात्मा सूर्यलोके महीयते ॥८७॥ अपुत्रो लभते पुत्रं कुजन्मा जन्म
वाप्नुयात्। कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ॥८८॥ यस्त्वा
दित्यदिने पार्थ नाभिमात्रे जलेस्थितः। उदयाचलमारूढं भास्करं प्रण
तस्थितः। जपेते मानवो भक्त्या शृणुयाद्वापि भक्तितः। स याति परमं
स्थानं यत्र देवो दिवाकरः ॥९०॥ अमित्रदमनं पार्थ यदा कर्तुं समा

चरेत्। तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांशुना ॥९१॥ आक्रम्य
वामपादेन आदित्यहृदयं जपेत्। ॐ ह्रिं माली स्वाहा। ॐ ह्रिं माली ठं स्वा
हा। त्रिभिश्च रोगी भवति ज्वरी भवति पंचभिः ॥९२॥ जपेत्तु सप्तभिः
पार्थ राक्षसीं तनुमाविशेत्। राक्षसेनाभिभूतस्य विकारान् शृणु
पांडव। गायते नृत्यते नग्नस्य आस्फोटयति धावति। शिवारुतं च कु
रुते हसते क्रंदते पुनः ॥९४॥ एवं संपीडितं पार्थ यद्यपि स्यान्महेश्वरः
किं पुनर्मानुषः कश्चिच्छौचाचारविवर्जितः ॥९५॥ पीतस्य न संदेहो
ज्वरी भवति दारुणः। यदा त्वनुग्रहं तस्य कर्तुमिच्छेच्छुभंकरं ॥९६॥

८ तदा सलिलमादाय जपेन्मंत्रमिमं बुधः ॥ ९७ ॥ ॐ नमो भगवते भ्यैं तु
मादित्याय नमो नमः ॥ जयाय जयभद्राय हरिदश्वाय ते नमः ॥ ९८ ॥
स्नापयेत्तेन मंत्रेण शुभं भवतु नान्यथा ॥ अन्यथा च भवेद्दोषेन त्रपतेना
त्रसंशयः ॥ ९९ ॥ स्तुवंतेनिखिलं प्रोक्तं पूजां चैव निबोध मे ॥ उपलिप्य
शुचौ देशे नियतो वाग्यतः शुचिः ॥ १०० ॥ वर्तुलं वा चतुरस्रं वा मंडलं
गोमयेन तु ॥ तथा तत्र लिखेत्सम्यगष्टपत्रं सकर्णिकं ॥ २ ॥ पूर्वपत्रे लिखेत्सू
र्यमाग्नेय्यां तु रविं न्यसेत् ॥ याम्यां चैव विवस्वंतं नैरृत्यां च भगं न्यसेत् ॥ वा
रुण्यां वरुणं विंद्याद्वायव्यां मित्रमेव च ॥ आदित्यमुत्तरे पत्रे ऐशान्यां विष्णु

मेव च ॥ ३ ॥ माहातेजः समक्ष्यंत प्रपद्येत कृतांजलि ॥ सकेशराणि पद्मा
णि करवीराणि पांडव ॥ ४ ॥ तिलतंदुलसंयुक्तं कुशागंधोदकानि च ॥ रक्तचं
दनमिश्राणि कृत्वा वै ताम्रभाजने ॥ ५ ॥ धृत्वा शिरसि तत्पात्रं जानुभ्यां
धरणीतले ॥ मंत्रपूतं गुडाकेश अर्घ्यं दत्वा गभस्तिने ॥ ६ ॥ ॐ विघ्नौ कि
लकिलकटुकटुसर्वार्थसाधनाय स्वाहा ॥ ॐ ह्रां ह्रीं ह्रूं हः ॥ सः सूर्य स्वा
हा ॥ ॐ खां खं खः खोल्काय सूर्यमूर्तये स्वाहा ॥ ॐ मार्तंडाय स्वाहा ॥ नमो
स्तु सूर्याय नमोस्तु भानवे नमोस्तु वैश्वानर जातवेदसे ॥ त्वमेव चार्घ्यं प्रति
गृह्ण देवदेवाधिदेवाय नमोस्तु भूयः ॥ ७ ॥ एहि सूर्य सहस्रांशो तेजोरा

॥९॥ त्रिजगत्पते॥ अनुकंपय माभक्त्या गृहाणार्घ्यं नमोस्तु ते॥९॥ नमो भगव
ते तुभ्यं नमस्ते जातवेदसे॥ दत्तमर्घ्यं मया भानो त्वं गृहाण नमोस्तु ते॥१०॥
ॐ नमो भगवते सूर्याय नमः॥ अक्षय्यतेजसे नमः॥ ॐ शिवाय नमः॥
आदित्यस्य शिवं विद्याच्छिवमादित्यरूपिणं॥ उभयोरंतरं नास्ति आदित्यस्य
शिवस्य च॥११॥ एतद्दिक्षाम्यहं कर्के पुरुषो वै दिवाकरः॥ तत्र व्याख्यान बाध्यं
तेन व्याधिभ्यो भयं भवेत्॥१२॥ उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः॥ अ
स्तमाने स्वयं विष्णुस्त्रिमूर्तिश्च दिवाकरः॥१३॥ नमो भगवते तेजसे विश्वे
जातवेदसे॥ ममार्घ्यं प्रतिगृह्णीष्व देवदेव नमोस्तु ते॥१४॥ हिमघ्नाय त

मोघ्नाय रक्षोघ्नाय च वै नमः॥ रुनघ्नायच्च देवाय नमस्मै सूर्यात्मने नमः॥१५॥
जयो जयश्च विजयो जितप्राणो जितश्रमः॥ मनोजवो जितक्रोधो वाजिनः
सप्तकीर्तिनः॥१६॥ हरीतहयरथं दिवाकरं कनकमायांबुजरेणुपिं
जरं॥ प्रतिदिनमुदयेनव नवं शरणमुपैमि हिरण्यरेतसं॥१७॥ तत्र व्या
ख्यानबाध्यं तेन व्याधिभ्यो भयं भवेत्॥ न नागेभ्यो भयं चैव न च भूत
भयं क्वचित्॥१८॥ अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च॥ दुर्दु
र्लितरवो घोरो प्रज्ञां च लभते पशून्॥१९॥ सिद्धिकामो लभेत्सिद्धिं कन्या
कामस्तु कन्यकां॥ एतत्पठति कौंतेय भक्तियुक्तेन चेतसा॥२०॥ अघ

॥१०॥ मेधसहस्रस्य वाजपेयिशतस्य च । कन्याकोटिसहस्रस्य दत्तस्य फ
लमाप्नुयात् ॥ २१ ॥ इदमादित्यहृदयं यो धीते स तु नरः । सर्वपापवि
शुद्धात्मा सूर्यलोके महीयते ॥ २२ ॥ नास्त्यादित्यसमो देवो नास्त्यादित्य
समा गतिः । प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठितं । गवां शत
सहस्रस्य सम्यक् दत्तस्य यत्फलं । तत्फलं लभते नूनं शुद्धात्मा स्तौति यो
रविम् ॥ २४ ॥ यो धीते सूर्यहृदयं सकलं भवेत् । अष्टानां ब्राह्मणानां च
लिखित्वा समर्पयेत् ॥ २५ ॥ ब्रह्मलोक ऋषीणां च जायते मानुषेष्विवा
जातिस्मरत्वं लभते शुद्धात्मा नात्र संशयः ॥ २६ ॥ अजाय लोकत्रय

पावनाय भूतात्मने गोपतये वृषाय । सूर्याय सर्वप्रलयांतकाय नमो
महाकारुणिकोत्तमाय ॥ २७ ॥ विवस्वते ज्ञानभृतां तरात्मने जग
त्प्रदीपाय जगद्धितैषिणे । स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्त
मायामिततेजसे नमः ॥ २८ ॥ सुरैरनेकैः परिसेविताय हिरण्यगर्भा
य हिरण्मयाय । महात्मने मोक्षप्रदाय नित्यं नमोस्तु ते वासरका
रणाय ॥ २९ ॥ आदित्यश्चार्चितो देवैः आदित्यः परमं पदं । आदि
त्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत् ॥ ३० ॥ आदित्यं पश्य
ते भक्त्या ध्रुवं पश्यति मानवः । नादित्यं पश्यते भक्त्या स न पश्ये

तस्मां नरः ॥ ३१ ॥ त्रैगुण्यं च त्रितत्वं च त्रयो लोकत्रयो ग्नयः । त्रयाणां तं
तथा कर्त्ता तुरीयस्त्वं नमोस्तु ते ॥ ३२ ॥ नमः सवित्रे जगदेकचक्षुषे ज
गत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिना
रायणशंकरात्मने ॥ ३३ ॥ यस्योदये चेह जगत्प्रबुध्यते प्रवर्त्तते चाखिल
कर्मसिद्धये । ब्रह्मेंद्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंडले र
विः ॥ ३४ ॥ नमोस्तु सूर्याय सहस्रभानवे सहस्रशाखान्वितसंभवात्म
ने । सहस्रयोगोद्भवभोगभागिने सहस्रसंख्यायुगधारिणे नमः ॥ ३५ ॥
यन्मंडलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपं । दारिद्र्यदु

ःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यं ॥ ३६ ॥ यन्मंडलं देवगणैः
सुपूजितं विप्रस्तुतं भावनमुक्तिकोविदं । तं देवदेवं प्रणमामि सूर्यं
पुना० ॥ ३७ ॥ यन्मंडलं ज्ञानमयं च रम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपं ।
समस्ततेजोमयदिव्यरूपं पुना० ॥ ३८ ॥ यन्मंडलं गूढमतिप्रबोधं
धर्मस्य वृद्धिं कुरुते जनानां । तत्सर्वपापक्षयकारणं च पु० ॥ ३९ ॥
यन्मंडलं व्याधिविनाशदक्षं यदृग्यजुःसामसु संप्रगीतं । प्रकाशि
तं येन च भूर्भुवः स्वः पुना० ॥ ४० ॥ यन्मंडलं वेदविदो वदंति नित्यमर्त्य
मर्त्यासुरसिद्धरक्षाः । यद्योगिनो योगयुजां च संघाः ॥ पु० ॥ ४१ ॥

यन्मंडलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके॥ यत्कालकालादिमनादिरूपं पुना०॥४२॥ यन्मंडलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानां॥ यत्कल्पकल्पक्षयकारणं च पुना०॥४३॥ यन्मंडलं विश्वसृजं प्रसिद्धं उत्पत्तिरक्षाप्रलयप्रगल्भं॥ यस्मिन् जगत् संहरतेखिलं च पुना०॥४४॥ यन्मंडलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्वं॥ सूक्ष्मैरंकैर्योगरत प्रसिद्धं पुना०॥४५॥ यन्मंडलं ब्रह्मविदो वदंति गायंति यच्चारणसिद्धसंघाः॥ यन्मंडलं मंत्रविदः स्मरंति पुना०॥४६॥ यन्मंडलं वेदविदोपगीतं यद्योगिनां योगपथा

नुगम्यं॥ तं सर्वदेवं प्रणमामि सूर्यं पुना०॥४७॥ भास्वद्रत्नाढ्यमौलिस्फुरदतुलरुचिनिर्मितानाचारुमूर्तिर्भास्वान्नोदिव्यनेत्रः करधृतकमलः स्वर्णवर्णप्रभाभिः॥ विश्वाकाशावकाशग्रहपतिशिखरे भाति उदयाचलेयो सर्वानंदप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः॥४८॥ ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः॥ केयूरवान् मकरकुंडलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः॥४९॥ सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रांतमनंतमुच्यते॥ भजामि बुध्यातपनीयमूर्तिं सुरोत्तमं चित्रविभूषणो

ज्वलं॥५०॥वेदवेदांगशारीरंदिव्यदिप्तिकरंपरं॥रक्षोघ्नंरक्तवर्णंचस्र
ष्टिसंहारकारकं॥५१॥लोकप्रभाकरश्चैवलोकचक्षुर्महेश्वरः॥तप
नस्तापनश्चैवशुचिःसप्ताश्ववाहनः॥५२॥एकचक्रोरथोयस्यदि
व्यःकनकभूषितः॥सप्तमेनवतुसंप्रीतोपद्महस्तोदिवाकरः॥तृति
येभास्करःप्रोक्तंचतुर्थेतुप्रभाकरः॥५४॥पंचमेतुसहस्रांशुःषष्ठे
चैवत्रिलोचनः॥सप्तमंहरिदश्वश्चअष्टमेतुविभास्करः॥५५॥नव
मेदिनकृत्प्रोक्तंदशमंद्वादशात्मकः॥एकादशंत्रयीमूर्तिर्द्वादशोसूर्य
एवच॥५६॥द्वादशादित्यनामानिप्रातःकालेपठेन्नरः॥दुःखप्र

णश्यतेतस्यसर्वदुःखंचनश्यति॥५७॥दद्रुकुष्टहरंचैवदारिद्र्यंहरतेध्रुवं॥स
र्वतीर्थप्रदंचैवसर्वकामप्रवर्धनं॥५८॥यःपठेत्प्रातरेवहिभक्त्यानित्यमिदं
नरःसौख्यमायुस्तथारोग्यंलभतेमोक्षमेवच॥५९॥अग्निमीळेनमस्तु
भ्यंइषेत्वोर्जेतिरूपिणे।शन्नोदेवीनमस्तुभ्यंजगच्चक्षुर्नमोस्तुते॥पद्मा
सनःपद्मकरःपद्मगर्भसमद्युतिः॥सप्ताश्वरथसंयुक्तोद्विभुजस्यात्स
दारविः॥६१॥आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने॥जन्मांतरसह
स्रेषुदारिद्र्यंनोपजायते॥६२॥नमोधर्मविधानायनमस्तेकृतसाक्षि
णे नमःप्रत्यक्षदेवायभास्करायनमोनमः॥६३॥उदयगिरीमुपेतं

आ०
१४

भास्करं पद्महस्तं सकलभुवननेत्रं रक्तयज्ञोपमेयं। तिमिरकरिमृगेंद्रं
बोधकं पद्मिनिनां सुरनरमुनिवंद्यं सुंदरं विश्वदीपं॥ ६४ इतीश्रीभ
विष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे श्रीमाहादित्यहृदयस्तोत्रं सं
पूर्णं॥ श्रीसूर्यनारायणार्पणमस्तु॥ छ छ छ॥ छ छ छ॥

दि०॥
१४